



The following is a rare hymn on **Lord Nataraja of Chidambaram** (Tamil Nadu, India) which is based on **Shiva Panchakshara Mantra (OM hrIM shrIM namaH shivAya)** by **Lord Skanda** taken from **Shiva Rahasyam**.

The brief **Phalashruti** mentions that one who recites this hymn daily gets long life, knowledge, boons, progeny and all kinds of wealth by the grace of **Lord Nataraja**.

ॐ ह्रीं श्रीं नमः शिवाय ।

श्रीस्कन्द उवाच –

ओङ्कारार्णव भासमान वपुषं ओङ्कार-वाच्यं विभुम् ।
ओतप्रोत जगच् चराचर तनुं ओजस्विदूरङ्गमम् ।
ओड्याणाभिध पीठिकान्तर लसद् देवी सनाथं शिवम् ।
ओजोनायक मण्डलस्थं उडुराट् चूडं नटेशं भजे ॥ १ ॥

ह्रींमूर्त्या शिवया विराण्मय मही-हृत्-पङ्कजस्थं सदा ।
ह्रीणानां शिव कीर्तने हितकरं हेलाहृदां मानिनाम् ।
ह्रीबेरादि सुगन्ध वस्तु रुचिरं हेमाद्रि-बाणासनम् ।
ह्रीङ्काराङ्कित पाद पीठं अतुलं हृद्यं नटेशं भजे ॥ २ ॥

श्रीमद् ज्ञान-सभान्तरे प्रविलसच् छ्रीपञ्चवर्णाकृतिम् ।
श्रीवाणी विनुताङ्घ्रि पङ्कज युगं श्रीवल्लभेनार्चितम् ।
श्रीविद्यां अनुमोदितं श्रित-जन-श्रीदायकं श्रीधरम् ।
श्रीचक्रान्तर-वासिनं शिवं अहं श्रीमन्नटेशं भजे ॥ ३ ॥

नव्याम्भोज-मुखं नमज्जलनिधिं नारायणेनार्चितम् ।
नाकौकोनगरी नदी विलसितं नागाजिनालङ्कृतम् ।
नाना-रूपक नर्तनादि चतुरं नालीकजान्वेषितम् ।
नादात्मानं अहं नगेन्द्र-तनया-नाथं नटेशं भजे ॥ ४ ॥

मध्यस्थं मधु-वैरि-मार्गित-पदं मद्वंश-नाथं प्रभुम् ।
मारारातिं अतीव-मञ्जु-वपुषं मन्दार-गौर-प्रभम् ।
मायातीतं अशेष-मङ्गल-निधिं मद्भावना-भावितम् ।
मध्ये व्योम-सभं लसन्तं अखिलं मान्यं नटेशं भजे ॥ ५ ॥

शिष्टैः पूजित पादुकं शिवकरं शीतांशु रेखाधरम् ।
शिल्पं भक्तजनावने शिथिलिताघौघं शिवायाः-प्रियम् ।
शिक्षा-कारणं अम्बुजासन शिरो-भूषं सुशीलं प्रभुम् ।
शीतापाङ्ग विलोकनं शिवकरं श्रीमन्नटेशं भजे ॥ ६ ॥

वाणी-वल्लभ-वन्द्य-वैभव-युतं वन्दारु-चिन्तामणिम् ।
वाताशाधिप-भूषणं वरकृपा-वारां-निधिं-योगिनाम् ।
वाञ्छा-पूर्ति-करं वलारि-विनुतं वाही-कृता ऽम्नायकम् ।
वामाङ्गाप्त वराङ्गनं वरकृपा-वासं नटेशं भजे ॥ ७ ॥

यक्षाधीश-सखं यम-प्रमथनं यामिन्यधीशाननम् ।
यज्ञ-ध्वंस-करं यतीन्द्र-विनुतं यज्ञ-क्रियाधीश्वरम् ।
याज्यं याजक-रूपिणं यम-धनैर् यत्नोप-लभ्याङ्घ्रिकम् ।
यानीभूत-वृषं यदूद्भवनुतं देवं नटेशं भजे ॥ ८ ॥

॥ फलश्रुतिः ॥

श्रीमाया विलसच् चिदम्बर महापञ्चाक्षरैरङ्कितान् ।
श्लोकान् येऽनुदिनं पठन्ति नितरां चिन्तामणीनामकान् ।
तेषां भाग्य विशेषं आयुर् अधिकं विद्या वरान् सत्सुतान् ।
सर्वाभीष्टमसौ ददाति सहसा श्रीचित्सभाधीश्वरः ॥ ९ ॥

---

॥ इति श्रीशिव रहस्ये श्रीस्कन्द कृत
श्रीचिदम्बर पञ्चाक्षर स्तवः सम्पूर्णम् ॥